श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री करुणाकराचार्य विरचिता

# ॥ बिण्डिगनविले गरुडाष्टकस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ बिण्डिगनविले गरुडाष्टकस्तुतिः ॥

दृष्ट्वा नृत्यन्मयूरं द्विजपतिरभवत् सक्तचित्तः पुरेऽस्मिन्
भोगीद्धा मूर्तिरस्य स्थिरवपुरथ सा चान्दने दारुणीष्टा।
पत्न्यौ रुद्रासुकीर्ती रथचरणसुधाकुम्भशङ्खान् गदां तां
बिभ्रद्धस्तेषु देवश्चरतनुरपि स श्मश्रुरम्योऽथ सेव्यः॥ १॥

"सेनेशो देवतानां शचिपतिसहजस्त्वां ध्वजं वाहनञ्च
व्यातानीद्विष्णुरेवं दितिसुतमतनोत् षण्मुखश्शूरसञ्ज्ञम्।
तस्येमे वाहवंश्या वयमिह गिरिषु प्राप्तनृत्ता मयूराः
पक्षीन्द्र! स्यास्थिरो नः परिसर" इति तैः प्रार्थितो नेत एता॥ २॥

पक्षीन्द्रः पन्नगारिः पटुरमृतहृतौ पद्मनाभस्य वाहः
पान्तं पादिं नतानामपहरति मुदेत्याप्तकीर्तिस्सुकीर्त्या।
युक्तो रुद्राख्ययाऽसौ विहरति विनतानन्दनोऽस्यां मयूर-
श्रीपुर्यां सेवमानो लघुतनुमनघं केशवं पद्मजां च॥ ३॥

सव्यादन्यत्र बिभ्रत् गुलिकमथ भुजे कङ्कणं शङ्खपालं
कोटीरे हारमेवं कलिरिपुभुजगं ब्रह्मसूत्रं विभाति।
मन्थानं मन्दराद्रेः श्रुतियुगलगतं पद्ममेवं महान्तं
पद्मं तं तक्षकाख्यं कटितटघटितं सव्यहस्तेऽथ शेषम्॥ ४॥

पुत्रोऽसौ कश्यपर्षेर्विहरति विनतालालितः सूरसूतो
भ्राताऽस्येत्यस्ति सेव्यः प्रग इह सकलैः रुद्रयाऽऽसौ सुकीर्त्या।
कान्ताभ्यां भाति जुष्टः पविसुविभवदो घुष्यमाणस्सुपर्णः
तादृक्षैस्तापसेन्द्रैः तनुमधि च मनो मे व्यथा हन्तु सर्वाः॥ ५॥

केकाश्श्रुत्वा द्विजानां निजकुलजनिता इत्यसावत्र सक्तः
काञ्चीतो वाहरूपी स्थिरवसतिरभूत् मार्ग एवं मदीयान्।

www.prapatti.com

रुद्रादेव्यास्सुकीर्त्या अमृतघटयुगं वक्षसोर्मर्दयन् ते
आलिङ्गन् कञ्चनान्यत् दधदमृतघटं चार्तनादानवेन्माम्॥ ६॥

कोपिष्ठौ कौश्चिदास्तां मुनिवरतनयौ दायकालेऽतिरूक्षौ
''हस्ती भूया'' ''स्तथा त्वं'' कमठ इति रुषाऽन्योन्यमादत्तशापौ।
शापेनैवं न शान्तावपि च पुनरुभौ जन्मनि प्रेष्टयुद्धौ
कुक्षौ निक्षिप्य जीर्णौ कलयतु कलयन् सौमनस्यं जनेषु॥ ७॥

''वाताशैरष्टभिस्सम्लसति खगपतिश्चान्दनः पार्श्वभूमौ
वातात्मा चान्दनोऽहं लघुचरण इति प्रोच्यमानः कपिं माम्।
पाताऽसौ नस्समीपे यदि पतगपतिर्नो न भीर्नापदस्स्युः
साक्षी तत्राऽह'' मित्थं किमु वदति नतान् श्रीबृहत्पादसेवी॥ ८॥

अष्टसर्पविभूषाढ्यं इष्टकेकिपुरस्थितिम्।
अष्टकेन नमन्नेवं इष्टसिद्धिमवाप्नुयात्॥ ९॥

पक्षीति वाचं त्वथवा क्षिपेति पत्नीमथाग्नेः प्रणवं च वक्तुम्।
प्राप्तोपदेशोऽप्यपि नालमेषः श्रीकेकिभूनाथममुं प्रपद्ये॥ १०॥

शास्त्रसाहितीवल्लभोदितं केकिपूःखगेट्पादयोरिदम्।
अष्टकं पठन् भक्तिमान्नरः कष्टतो भजेन्मुक्तिमद्भुताम्॥ ११॥

॥ इति बिण्डिगनविले गरुडाष्टकस्तुतिः समाप्ता॥

www.prapatti.com